श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्रीरङ्गनाथ पादुकासहस्रम् ॥

## ॥ यन्त्रिकापद्धतिः षड्विंशी ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ यन्त्रिकापद्धतिः षड्विंशी ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

उदग्रयन्त्रिकां वन्दे पादुकां यन्निवेशनात्।
उपर्यपि पदं विष्णोः प्रत्यादिष्टप्रसाधनम्॥ २६.१ ॥

प्रसभं प्रतिरुध्य कण्टकादीन्
    भवती शौरिपदाम्बुजादधस्तात्।
चरणावनि ! धारयत्यमुष्मिन्
    उचितच्छायमुपर्यपि प्रतीकम्॥ २६.२ ॥

मुरभिन्मणिपादुके ! त्वदीयां अनघामङ्गुलियन्त्रिकामवैमि।
स्वयमुन्नमितां प्रदेशिनीं ते परमं दैवतमेकमित्यृचन्तीम्॥ २६.३ ॥

स्वदते मणिपादुके ! त्वदीया पदशाखायुगयन्त्रिका विचित्रा।
परमं पुरुषं प्रकाशयन्ती प्रणवस्येव परेयमर्धमात्रा॥ २६.४ ॥

अनुयातमनोरथा मुरारेः
    भवती केळिरथश्रियं दधाति।
चरणावनि ! यन्त्रिका तवैषा
    तनुते कूबरसम्पदं पुरस्तात्॥ २६.५ ॥

शङ्के भवत्याः सुभगं प्रतीकं रङ्गेशपादाङ्गुळिसङ्ग्रहार्थम्।
त्राणाय पादावनि ! विष्टपानां आज्ञाकरीमङ्गुळिमुद्रिकां ते॥ २६.६ ॥

अलङ्कृतं कर्णिकयोपरिष्टाद्
    उदग्रनाळं तव यन्त्रिकांशम्।
पद्मापतेः पादसरोजलक्ष्म्याः
    प्रत्येमि पादावनि ! केळिपद्मम्॥ २६.७ ॥

उपरि विनिहितस्य केशवाङ्घ्रेः
    उपरि पदावनि ! यन्त्रिकात्मिका त्वम्।
इति तव महिमा लघूकरोति
    प्रणतसुरेश्वरशेखराधिरोहम्॥ २६.८ ॥

नित्यं पदावनि ! निबद्धकिरीटशोभं
    पद्मालयापरिचितं पदमुद्वहन्त्याः।
अङ्गीकरोति रुचिमङ्गुळियन्त्रिका ते
    साम्राज्यसंपदनुरूपमिवातपत्रम्॥ २६.९ ॥

प्रथमा कलेव भवती चरणावनि ! भाति रङ्गचन्द्रमसः।
शृङ्गोन्नतिरिव यत्र श्रियं विभावयति यन्त्रिकायोगः॥ २६.१० ॥

॥ इति श्रीपादुकासहस्रे यन्त्रिकापद्धतिः षड्विंशी ॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥